राँचीविश्वविद्यालयस्य पी-एच० डी० (संस्कृतम्) उपाधिप्राप्तये प्रस्तावितं

शोधप्रारूपम्

(मानविकी संकायः)

स्नातकोत्तर-संस्कृतविभागः राँचीविश्वविद्यालयः, राँची

“विश्वकवेः रवीन्द्रनाथस्य गीताञ्जलेः वङ्गप्रदेशीयानां संस्कृतानुवादपरम्परा”

शोधनिर्देशिका

डॉ० भारती द्विवेदी
सहायकप्राध्यापकः
संस्कृतविभागः
राँची विश्वविद्यालय, राँची

शोधार्थी

शीला हालदारः

प्रस्तावितः शोधसारः

विश्वकवेः रवीन्द्रनाथस्य गीताञ्जलेः वङ्गदेशीयानां संस्कृतानुवादपरम्परा

1.0. विषयविश्लेषणम् -

'अनु पश्चादुद्यत उच्यते कथ्यते' इति विग्रहे अनुपूर्वकाद् वद्धातोरुत्तरं भावार्थकघञा निष्पन्नोऽयमनुवादशब्दः। ननूक्तस्य पुनरुक्तावापद्येत पुनरुक्तदोष इति चेन्न प्रकृतभाषयोपनिबद्धविषयस्य तत्तद्भाषाज्ञानाय भाषान्तरानुवादस्योपकारकत्वात्। अनुवादो महच्छिल्पकर्मैकम्। इदन्त्वनुवादकर्म किमप्यसिधाराव्रतं प्रतिभाति। तत्र मूललेखकस्य भावसाम्राज्यं स्यात्, शब्दसम्पत्तिर्भवेत्, चान्ततो गत्वा लक्ष्यभाषाया भाषामर्यादाप्यक्षुण्णा स्यात्। अनुवादस्य साफल्यविधावनुवादकर्तुर्यथापेक्षिता सहृदयताचुम्बिनी तथा सृष्टिधर्मिणी प्रतिभा । चिरं प्रगल्भा चकास्तिअनुवादसाहित्येऽपि वङ्गीया प्रतिभा। संस्कृतानुवादधारा द्विशाखतया विभज्यते – संस्कृतभाषातो भाषान्तरेष्वनुवादरूपा भाषान्तरेभ्यः संस्कृतभाषायामनुवादरूपा च। द्विविधायामस्यामनुवादधारायां वङ्गीयप्रतिभा प्राधान्येन आङ्गलभाषां वङ्गभाषाञ्चाश्रयति।

1.1. वङ्गभाषातोऽनुवादः, रवीन्द्रसाहित्यम्-

ऊनविंशशताब्दीतः इदानीन्तनकालं यावत् विविधेषु भारतीयभाषासाहित्येषु वङ्गसाहित्यस्य संस्कृतेऽनुवादो विपुलायतन इति विद्वांसो मन्यन्ते। तत्र वङ्गभाषातः

संस्कृतभाषायां क्रियमाणेऽनुवादसाहित्ये रवीन्द्रसाहित्यं सर्वोत्तमं स्थानमधिकरोतीत्यत्र नास्ति संशयः। वयं सर्वे जानीमो यत् रवीन्द्रनाथेन गीताञ्जलेः आङ्गलानुवादं विधाय नोवेल्-पुरस्कारं प्राप। परवर्तिनि काले मूलस्य वङ्गभाषया लिखितस्य गीताञ्जलेः संस्कृतानुवादपरम्परा जाता भारतवर्षे। वङ्गीयाः पण्डिताः वङ्गभाषायाः कवि-औपन्यासिक-नाट्यकृतानां कृतीनामनुवादं विहितवन्तः। ने केवलमेतदेव, आङ्गल-हिन्दी-ओडियादिभाषाभ्यः श्रेष्ठकाव्यानां संस्कृतानुवादकरणे वङ्गीयानां साधु प्रयासो दृक्पथमायाति। परम् अस्मिन् शोधनिर्यासे वङ्गदेशे गीताञ्जल्याः ये चानुवादाः दृश्यन्ते, तेषां विचारं कर्तुमीहे।आदावेव किञ्चिद्दिग्दर्शनं विधीयते स्थालिपुलाकन्यायेन कृतिमतिना अतिमन्दमतिना मया गीताञ्जलेः संस्कृतानुवादपरम्परा वङ्गीयानाम् –

1.1.1. गीताञ्जलेःसंस्कृतानुवादविश्वम्-

<u>**अनुवादकः**</u>	<u>**प्रकाशकः**</u>	<u>**प्रकाशकालः**</u>
अमरेन्द्रमोहनतर्कतीर्थः	संस्कृतपुस्तकभाण्डारः	1929 (पुनर्मुद्रणम् 2010)(गीतद्वयम्)
कालीपदतर्काचार्यः	विश्वभारती (पुस्तकाकारेण गीताञ्जलिच्छाया)	संस्कृतसाहित्यपरिषत्पत्रिकायां 1961 ईशवीयाब्दतः क्रमान्वयेन स्फुटरूपेण प्रकाशितम्, परं पुस्तकरूपेण

		विश्वभारतीग्रन्थनविभागतः प्रकाशपदवीं गतो ग्रन्थोऽयम्।
इन्द्रमोहनचक्रवर्ती	संस्कृतप्रतिभा	सप्त गीतानि (1966)
दुर्गादासगोस्वामी	संस्कृतप्रतिभा	षड् गीतानि (1966)
रामप्रसन्नभट्टाचार्यः	रवीन्द्रकाव्यकुसुमाञ्जलिः. दिल्ली संस्कृत अकाडेमी	2001
लक्ष्मीकान्तपञ्चतीर्थः	निर्झरशीकरमिति ग्रन्थः, अमृतलोकसाहित्यपरिषद्, मेदिनीपुरम्	गीतद्वयम्, 2000
दीपकघोषः	कवीन्द्ररवीन्द्रम्	दश गीतानि (1995)
विश्वश्वरविद्याभूषणः	संस्कृतरवीन्द्रम्	गीतमेकम् (1966)
विश्वनाथभट्टाचार्यः	सागरिका, सागरविश्वविद्यालयः, सागरः	गीतमेकम्
गिरिजाप्रसन्नलाहिडी	संस्कृतसाहित्यपरिषत् (रवीन्द्रसंख्या, 2012) (स्फुटरूपेण, 9.389)	गीतत्रयम्
निखिलेशचक्रवर्ती	सत्यानन्दम्, जाह्नवी, समाजभारती चेति पत्रिकासु	अशीतिसंख्यकानां रवीन्द्रगीतीनाम् अनुवादः
इन्दिराचट्टोपाध्यायः	विराज मम नयनसम्मुखे	दश गीतानि (2005)

	(Raga Music)	

न केवलं वङ्गीयाः, ये च प्रायेण अवङ्गीयाः वङ्गभाषां न जानन्ति, ते अपि आङ्गलानुवादाश्रयेण गीजाञ्जलेरनुवादं विहितवन्तः। तेषु मुख्याः सन्ति – आन्ध्रदेशीय-पुल्लेलश्रीरामचन्द्रः, केलप्रान्तीय-गोपालपिल्लाइ-उड्डालुसुब्बरामशास्त्रि-मा.कृष्ण.नम्पूतिरिप्रभृतयः। तत्र पुल्लेलश्रीरामचन्द्रेण तथा च गोपालपिल्लाइ-महाभागाभ्यां कृतानुवादे 103संख्यकानि गीतानि विद्यन्ते। रामचन्द्रेण मन्दाक्रान्ताच्छन्दसा तथा च पिल्लाइमहाभागेन जातिच्छन्दसा अनुवादो विहितः। मुख्यतः, सम्पूर्णे गीताञ्जलिकाव्ये 157संख्यकानि गीतानि विलसन्ति। काश्यपकविना कालीपदतर्काचार्येण विहिते अनुवादग्रन्थे संख्येयं पूर्णतया रक्षिता।

1.2.वङ्गीयानांगीताञ्जलेः अनुवादानां समीक्षणम् -

उपर्युक्ततालिकयैतत्प्रमाणीभवति यत् अनुवादसाहित्यप्रपञ्चे कालीपद-फटिकलालदास-अमरेन्द्रमोहनादीनामनुवादो नितरां प्रशंसार्हः। विशेषेण रवीन्द्रप्रतिभाया विश्वविस्मयसृष्टेर्निदर्शनभूतस्य ‘गीताञ्जलिकाव्यस्य’ संस्कृतवाङ्मयाञ्चितं रूपं प्रदर्शयितुं बहूनां वङ्गविदुषां प्रतिभा विहितावधाना कृतित्वमादधाना च देदीप्यते। ते च विद्वन्मूर्धन्यभूता गिरिजाप्रसन्नलाहिडी-कामिनीकुमाराधिकारी-कालीपदतर्काचार्य-अमरेन्द्रमोहनतर्कतीर्थ-प्रमुखाः।

एतेषु कालीपदतर्काचार्येण कृतोऽनुवाद एव प्रशस्यतम इत्यस्माकं मतिः। छन्दःशास्त्रस्य गुरुलघुमात्रानिशितपथेन गच्छतानुवादकेन मुलकवेर्हृद्भावानुगुणं भाषान्तरकरणरूपानुवादलक्ष्यान्न भ्रष्टम्। कालीपदेन अनुवादस्यास्योद्देश्यं प्राथम्येन व्याकृतम् –

तथापि तत्काव्यरसं कथञ्चिद्

वङ्गीयभाषामविदत्सु दित्सुः।

तथावबोधं विदधेऽनुवादं

वैश्वेन वृन्दारकवाङ्मयेन।।

क्वचिद्वाक्षरशोऽपि अनुवादस्तेन कृतः। किन्तु सहृदयहृदयानां सकाशे कवेर्भावान् उपस्थापयितुम् आधिक्येन विहितो भावानुवादः। गीताञ्जलेः प्रथमं गीतं तावत्-

"आमार माथा नत करे दाओ हे तोमार

चरण धुलार तले।

सकल अहंकार हे आमार

डुवाओ चोखेर जले।" इति

वङ्गभाषायां लिखितस्य गीतस्यास्य हिन्दीभाषानुवादस्तावत् –

मेरा माथा नत कर दो तुम

अपनी चरण-धूलि-तल में।

मेरा सारा अहंकार दो

डुबो- चक्षुओं के जल में।

कालीपदस्यानुवाद एवम्-

"(मम) शीर्षं नयनति मयि! तव

चरणरेणुतले।

सकलमहङ्कारं मम

मज्जयाश्रुजले" इति।

अनुवादोऽयं सर्वोत्तमतया प्रतिभाति। अनुवादेऽस्मिन् मौलिको भावः शब्दविन्यासश्च प्रायेणाव्याहतौ स्तः। केवलमेका जिज्ञासा –'चरणरेणुतले' इत्यत्र चरणधूलितले इति पाठे कृते शब्दविन्यासः समधिको मूलानुगः किं न स्यात्। अत्र सुधियः प्रमाणम्। क्वचित् 'हे' इत्यस्य अनुवादार्थं कश्चित् शब्दविशेषो नोपात्तः। 'मज्जयाश्रुजले' इत्यत्रमज्जयाक्षिजले इति पाठः साधीयान् स्यान्न वेति सुधीभिर्भाव्यम्। कथमिति चेदुच्यते 'अश्रु' इति पदं नेत्रजलस्य वाचकम्। मूले अस्ति- 'चोखेर जले'। अतः अक्षिजले इत्यनुवादे न पक्षपातः। कवेः मौलिकविचारो यथाक्षुण्णः स्यादित्येतदर्थमनुवादकः सर्वत्र प्रयत्नशील आसीदिति तस्यानुवादतः प्रतीयते स्पष्टतया।

अनुवादकर्मण्यस्मिन् कैश्चित् परम्परागतानां संस्कृतच्छन्दोनियमानां परिपूर्णतयानुसरणं विहितम् । कैश्चिदन्यैः निरुक्तनियमानुल्लङ्घ्य अनूद्यकवितानुगत्येन विधुभूषणभट्टाचार्येण रवीन्द्रनाथस्य उर्वशीकविताया अनुवादे संस्कृतच्छन्दो न समाश्रितम् । फटिकलालदासेन पुनः सैव कविता संस्कृतच्छन्दोमाध्यमेनानूदिता । दिङ्मात्रमुदाहरणं यथा –

"नह माता नह कन्या नह वधू सुन्दरी रूपसी,

हे नन्दनवासिनी उर्वशी ! (रवीन्द्रकवितापङ्क्तिः)

"न हि न माता न हि कन्या न हि सुन्दरी वधूरसि,

हे नन्दनवासिनि उर्वशि ! (विधूभूषणकृतोऽनुवादः)

"माता वधूर्वा दुहितानवद्ये

कस्यापि जातूर्वशि नासि लोके ।

आनन्दने नन्दनकाननाङ्के

वासो हि नित्यस्तव दिव्यधान्मि" (फटिकलालकृतोऽनुवादः)

अत्रेदं लक्षणीयं विधुभूषणकृतेऽनुवादे पदसन्निवेशविधौ ध्वनिसाम्यसृष्टौ मूलानुसारिता समधिका परिलक्ष्यते।फटिकलालकृतेऽनुवादे छन्द इन्द्रवज्रा, छन्दसो नियमपालनाय तत्र मूलातिरिक्तानि पद्यानि संजोजितानि । मूलकविताया ध्वनिवैशिष्ट्यं किञ्चित् क्षुण्णमिवाभाति।

किञ्च, कामिनीकान्तेनाधिकारिणा संस्कृच्छन्दोभिरनूदिता गीतयः। तस्यानुवादो यथा –

"शीर्षं मे तव पादसक्तरजसा नीचैः प्रभो धारय।

*सर्वं गर्वचयं ममाहमिति मे नेत्राम्बुभिः प्लावयः" //*इति।

(कामिनीकुमाराधिकारी, गीताञ्जलिसंस्कृतम्, 1961, पृ.-16)

कविताया अनुवादो मौलिककविताग्रथनतो दुष्कर इति अनुवादविशेषज्ञा अभिप्रयन्ति। यतो मौलिककवितायां कवेः स्वकीयानुभूतिरभिव्यक्ता भवति रीतिविशेषमवलम्ब्य । पक्षान्तरेणानुवादेऽन्येनाभिव्यक्ताया अनुभूतेः प्रकाशः करणीयो भवति। सफलानुवादस्य कृतेऽनुवादकस्य भावयित्र्याश्च प्रतिभाया विद्यमानतावश्यिकी। अनुवादको भावयित्र्या प्रतिभया भावयति तत्तद्भाषानिबद्धां कविकृतिम्, कारयित्र्या प्रतिभया च तां भाषान्तरे परिणामयति। अनुवादे यदि क्वचिदनुवादकस्य कण्ठो लभते प्राधान्यं तर्हि मूलानुगत्यं भवति विडम्बितम्।

रवीन्द्रनाथेन रचितानां कर्णयोर्मधुधारामभिवर्षतां सहृदयहृदयं समुन्मादयतां सङ्गीतानां संस्कृतभाषायां कृतानुवादकानां मध्ये कलिकाताविश्वविद्यालये प्राध्यापकवरस्य दीपकघोषस्य नाम पुरस्फूर्तिकतामायाति । तेन हि पञ्चविंशति-संख्यकानां रवीन्द्रसङ्गीतानां कविसार्वभौमदर्शितदिशा स्वरसंयोजनं विदधता संस्कृतेऽनुवादो विहितः। स चानुवादः

‘संस्कृतरवीन्द्रसङ्गीतम्’ इति नाम्ना साहित्य-एकाडेमीतः प्रकाशितो वर्तते । तेषां सङ्गीतानां नैका ध्वनिमुद्रा अपि प्राप्तरूपा विद्यन्ते । रवीन्द्रभारतीविश्वविद्यालयस्याध्यापिकास्वन्यतमया चट्टोपाध्यायोपनामिकया डक्टर्-इन्द्रिरया रवीन्द्रसङ्गीतानां संस्कृतानुवादे धृतव्रतया भूयते । तस्यैव संस्कृतेऽनूदितैः तयैव गीयमानैः दशभिः रवीन्द्रसङ्गीतैः समन्वितैका ध्वनिमुद्रा ‘Raga Music’ इति संस्थातः 2005-खृष्टवर्षे प्रकाशिता सङ्गीतानुरक्तैः समादृता च वर्तते।

वङ्गप्रदेशस्य विशिष्टेन महाविद्यालयाध्यापकेन निखिलेशचक्रवर्तिना नूनतया 2001 खृीष्टाब्दतः 2012वर्षं यावत् पञ्चदशाधिकैकशतसंख्यकानि रवीन्द्रगीतानि गीर्वाणवाण्यानूदितानि। तेष्वन्यतमत्वं भजन्ते - ‘केवला तव वाणी नास्ते’, ‘खेलागेहबन्धनपरो..’, ‘जगति आनन्दयज्ञे…’, ‘जयतु जयतु नवारुणोदयः..’, ‘जीवने मम यावदानन्दोः…’, ‘तव हि गेहे पालनं स्नेहैः..’, ‘त्वं नीरवेणासि..’, ‘तवानं शून्यमद्य...’, ‘दिवसा मे स्वर्णपञ्जरे नासन्...’ चेति ।न केवलं रवीन्द्रनाथीयगीतानाञ्चापि नजरुल-अतुलप्रसाद-रजनीकान्त-भूपेनहाजारिकादीनां वङ्गगीतीनां संस्कृतानुवादो विहितस्तेन प्रतिचरणमन्त्याक्षरसादृश्येन तथा च मूलगीतस्वरसाम्येन।

परिशेषे वक्तव्यं यद् ऊनविंश-विंशैकविंशशताब्द्यां वङ्गवास्तव्यानां संस्कृतानुवादशैली भारतवर्षस्य यस्यां कस्यामपि प्रादेशिकभाषाणामनुवादादुच्चकोटिकेति नास्ति संशयः। इदानीन्तनमनूदितसाहित्यं स्वकं नवनवीनं भव्यञ्च प्रस्थानं निर्माति इतरभाषाणां निरवद्यकाव्यास्वादने तत्पर्यायवाचकशब्दप्रयोगचमत्कारेण। प्रतिवर्षं चिरनवीना संस्कृतभाषा साहित्यस्य विविधविधाभिः काव्यकविताकथानाटकादिभिर्भवति सुसमृद्धा तदनुसारं तत्रानूदितसाहित्यस्य प्राचुर्यं लभते। यद्यपि मौलिकसाहित्यविरचनेऽस्माकं वङ्गीयानां यादृशी प्रवृत्तिर्न तथानुवादकरणे। तथाहि राधावल्लभत्रिपाठिनोक्तम्- ‘कवित्वकण्डुतिर्यथास्मान् बाधते, न तथानुवादचिकीर्षा’इति।तथापि निश्चप्रचमभिधातुमलं यत् पश्चिमवङ्गस्य शतकत्रितयव्यापि

संस्कृतानुवादविश्वं नितरां श्लाघ्यम्, तच्च मौलिकसंस्कृतसाहित्यमप्यधरीकर्तुं पार्यत इति मे विश्वासः।

3.0. शोधप्रबन्धस्य लक्ष्यमुद्देश्यञ्च –

क). मूलगीताञ्जलेर्मूलभावविश्वं संस्कृतानुवादे रक्षितं स्यान्न वेति।

ख). गीताञ्जलेः संस्कृतानुवादेषु कोऽनुवादः श्रेयान् कथञ्च?

ग) गीताञ्जलिमुपजीव्य यैरनुवादकैरनुवादो विहितस्तै कया शैल्या अनुवादः कृतः?

घ). गीताञ्जलेः संस्कृतानुवादे रवीन्द्रनाथस्य दार्शनिकी आध्यात्मिकी च चेतना कियती रक्षता वर्तते?

ङ). अनुवादकर्मणि अन्यकवीनामनुवादापेक्षया रवीन्दकाव्यं विशेषेण गीताञ्जलिं प्रति कथं अनुवादकानां कथं दृष्टिरधिका?

4.0. साहित्यसमीक्षणम् -

प्रस्तावितस्यास्य शोधकर्मणे मया ये च ग्रन्थाः प्रबन्धाः अधीताः, तेषामुल्लेखो विधीयते –

क).अधिकारी, कामिनीकुमारः - 1961, *गीताञ्जलिसंस्कृतम्*, शिलचरः,रवीन्द्रशतवार्षिकीसमितिः।

ख). तर्काचार्यः, कालीपदः - 1969, *गीताञ्जलिच्छाया*, विश्वभारती, कोलकाता।

ग). वारियर्, रामकृष्णः - 2008, *गीताञ्जलिः*, चिन्मय इण्टारनेशेनल फाउण्डेशन शोधसंस्थान, केराला।

घ).विश्वालः, वनमाली, नारायणः, दाशः, राकेशदाशः – 2012, *संस्कृतेऽनूदितं रवीन्द्रसाहित्यम्*, मान्यता प्रकाशन, नई दिल्ली।

घ). विश्वालः, वनमाली, नारायणः, दाशः, राकेशदाशः – 2012, *संस्कृतेऽनूदितं रवीन्द्रसाहित्यम्,* मान्यता

प्रकाशन, नई दिल्ली।

ङ). सेनः, शुभ्रजित् - 2019, *भारतवर्षे आधुनिकसंस्कृतसाहित्यम् – विहङ्गमदृष्ट्या*

परिशीलनम्, संस्कृत-पुस्तक-भाण्डार, कोलकाता।

च). दासः, करुणासिन्धुः (सम्पा.) - 2011, *संस्कृतसाहित्यपरिषत्पत्रिका* ((Vol.-LXXXXIV, NOS-1-2), कलिकाता, संस्कृतसाहित्यपरिषत्.

छ). आचार्यः, सीतानाथः -2008, *संस्कृतसाहित्ये वङ्गीयानामवदानम् विंशशताब्द्याः परिप्रेक्षे,* Proceedings of the National Seminar on Contribution of Bengal in some fields of Sanskrit Studies, Dept. Of Sanskrit, Ramakrishna Mission Vidyamandira.

5.0. प्रस्तावितम् अध्यायविभाजनम्-

भूमिका –

प्रथमः अध्यायः – साहित्यचर्चायाम् अनुवादस्य मूल्यम्

- संस्कृतभाषातोभाषान्तरेषुअनुवादस्यइतिहासः
- भाषान्तरेभ्यःसंस्कृतभाषायाम्अनुवादस्यइतिहासः

द्वितीयः अध्यायः – संस्कृतानुवादस्य परम्परा

- संस्कृतभाषातोभारतीयभाषासुअनुवादस्यऐतिह्यम्
- संस्कृतभाषातःवैदेशिकभाषासुअनुवादपरम्परा

तृतीयः अध्यायः – वङ्गीयानाम् संस्कृतानुवादविश्वम्

- रवीन्द्रनाथस्य कवितानां कथानाम् उपन्यासानाञ्च संस्कृतानुवादः

- शरत्-चन्द्रवङ्गिमचन्द्रयोः उपन्यासानां संस्कृतानुवादः
- वङ्गभाषया लिखितानां रूपकाणां संस्कृतानुवादः
- वैदेशिकभाषाणां साहित्यकृतीनां संस्कृतानुवादः

चतुर्थः अध्यायः – गीताञ्जलेः संस्कृतानुवादपरम्परा

- वङ्गीयानुवादकर्तृभिः गीताञ्जलेः संस्कृतानुवादः
- अवङ्गीयानुवादकर्तृभिः गीताञ्जलेः संस्कृतानुवादः

पञ्चमः अध्यायः – गीताञ्जलेः वङ्गीयानां संस्कृतानुवादानां सार्थक्यम्

- म.म.कालीपदतर्काचार्यस्य संस्कृतानुवादस्य वैशिष्ट्यम्
- अमरेन्द्रमोहनस्य गीताञ्जलेरनुवादस्य विशिष्टत्वम्
- दीपकघोषस्य गीताञ्जल्यनुवादस्य शैली
- अन्येषां गीताञ्जलेः संस्कृतानुवादानां वैशिष्ट्यम्

षष्ठः अध्यायः – गीताञ्जलेः संस्कृतानुवादे मूलस्रष्टुः भावविश्वं कियद्रक्षितमिति विचारः

उपसंहृतिः

6.0. परिशीलिता ग्रन्थानुक्रमणी

6.1. आङ्गल-वङ्गभाषाभ्यां लिखिता ग्रन्थततयः

Chattoapadhyay, Rita - 1. 1989, Mm. HaridāsaSiddhāntavāgîśa: An Appraisal’, Calcutta, Sanskrit Pustak Bhandar.

2. 2018, ‘ĀdhunikaSaṁskritaKāvya :BāṅalīManīṣāŚatavarṣerĀloke’, Kolkata, Sanskrit Pustak Bhandar.

अधिकारी, कामिनीकुमारः- 1961, *गीताञ्जलिसंस्कृतम्,* शिलचरः,रवीन्द्रशतवार्षिकीसमितिः।

तर्काचार्यः, कालीपदः - 1969, *गीताञ्जलिच्छाया*, विश्वभारती, कोलकाता।

त्रिपाठी,राधावल्लभः - 1999, *संस्कृतसाहित्य : बीसवींशताब्दी*,राष्ट्रियसंस्कृतसंस्थान, दिल्ली।

2006, *अभिनवकाव्यालंकारसूत्रम्*,राष्ट्रियसंस्कृत-संस्थानम्, दिल्ली ।

...................*संस्कृतसाहित्य का समग्र इतिहास*(चार खंड). 2018. भारतीय बुक कार्पोरेशन, दिल्ली।

वारियर्, रामकृष्णः - 2008, *गीताञ्जलिः*, चिन्मय इण्टारनेशेनल फाउण्डेशन शोधसंस्थान, केराला।

विश्वालः, वनमाली, नारायणः, दाशः, राकेशदाशः– 2012, *संस्कृतेऽनूदितं रवीन्द्रसाहित्यम्*,मान्यता प्रकाशन, नई दिल्ली।

मिश्रः, अभिराजराजेन्द्रः - 1993, *प्राग्वाचिकम्*,देववाणीसुवासः(प्रथमः खण्डः), देववाणीप्रकाशनम्, दिल्ली।

सेनः, शुभ्रजित् - 2019, *भारतवर्षे आधुनिकसंस्कृतसाहित्यम् – विहङ्गमदृष्ट्या परिशीलनम्*, संस्कृत-पुस्तक-भाण्डार, कोलकाता।

परिशीलिताः पत्रिकाः –

दासः, करुणासिन्धुः (सम्पा.) - 2011, *संस्कृतसाहित्यपरिषत्पत्रिका* ((Vol.-LXXXXIV, NOS-1-2), कलिकाता, संस्कृतसाहित्यपरिषत्.